गीदत्तात्रेयोमहामुनिः मनुष्याणांहितार्थायमृत्युज्ञानंप्रवक्ष्यति १५७ देयंचगुरुभक्तायनदद्याद्दुष्टमानुषे यस्मैकस्मैनदातव्यंना
न्यथाशांकरोदितं १५८ तद्दृष्टौनासिकायेननेत्रभ्रमरदृष्टकं स्वरामासाभ्यंतरेचमृत्युंयातिपितामहः १५९ नदृष्टारुंधतीयेनस्वप्नेक्कु
षिन्चमध्यतः स्वमासाभ्यंतरेमृत्युंयादिरक्षतिईश्वरः १६० स्नानसमयेकालेचमृत्युज्ञानंनिरीक्ष्यते हृदिशुष्कंभवेत्तस्यरवरामा
सानजीवति १६१ बुद्धिज्ञानक्रियाहीनं विपरीतंतुजायते द्विमासेनभवेन्मृत्युरेवमेवनसंशयः १६२ गतिचालनपापानांखण्डंख
ण्डंपतेद्यदि मासेनमृत्युंप्राप्नोतिवापक्षेच विशेषतः १६३ द्वादशदलचक्रस्थंमृत्युकालेचवीक्षितं चैत्रादौमाससंख्यानिलिख्य
तेद्वादशंदलं १६४ मेषादिराशयःस्थाप्याः सूर्यादिग्रहलेखनं जन्मर्क्षजन्मराशिंचवीक्ष्यतेमृत्युकालके १६५ शनिभौमकेतु
राहुराशिविद्धेतुकष्टता ऋक्षविद्धेराशिविद्धे कालेमृत्युर्नसंशयः १६६ सूर्यवेधेमनस्तापोबुधसौख्यंप्रवर्त्तते यात्रायांतीर्थजीवेच
चंद्रस्त्रीसुखसंततिः १६७ भृगोर्वेधेराज्यलाभंमासेमासेविचारयेत् वर्षद्वादशमासानिमृत्युकालेवदंतिच १६८ अहोरात्रंयदैकत्र
व हतोयत्रवायवो तदातस्यभवेदायुःसम्पूर्णवत्सरत्रयं १६९ अहोरात्रद्वयंयस्यपिंगलायाःसदागतिः तस्यवर्षद्वयंप्रोक्तंप्रवदंतिमुनीश्व
राः १७० रात्रौचंद्रोदिवासूर्योमासमेकंनिरंतरं भवेन्मृत्युर्नरस्तस्यैवषण्मासाभ्यंतरेध्रुवं १७१ शशांकंचारयेद्रात्रौदिवायस्यदिवा
करः इत्याभ्यासरतोनित्यंसयोगीनात्रसंशयः १७२ ॐनमोकालरूपायकालज्ञानंकुरु२स्वाहा अयुतंजपेत् इतिश्रीबृ॰ज्यो॰
मि॰ कालज्ञानाध्याये दत्तात्रयतन्त्रोक्तकालज्ञाननिरूपणंनामप्रकरणं ४ अथकालज्ञानं प्रयोगरत्नमालायां अष्टमप
रिच्छेदे येषांहृदिस्फुरतिशाश्वतमद्वितीयंतेजस्तमोनिवहनाशकरंरहस्यं तेषामखण्डशशिकांतिसुपुण्यभाजांस्वप्नेपिनोभ
वतिकालभयंनराणां १७३ योगजंमुखबिंबंचवीणातंत्रंकलामृतं एतेषुयोगतन्त्रेषुकालज्ञानंशिवोऽब्रवीत् १७४ रसंरसायणं
योगंकालंज्ञात्वासमाचरेत् तस्यज्ञानेवृथासर्वंक्लेशमेवोपशिष्यते १७५ कालज्ञानमहंतस्माद्ब्रुवेस्वस्यपरस्यच सिद्धिरूपोभ
वेत्कालःस्थूलसूक्ष्मप्रभेदतः १७६ लग्नादिसंभवस्थूलःसूक्ष्मोवाऽध्यात्मिकोमतः प्रतिपत्तिथिमारभ्यकलाभिश्चंद्रमाय

था १७७ प्रत्यहंकुरुतेकालः संख्यादेहस्थितस्तथा ऌमित्यादिकलायुक्तोहंसोपिप्रतिवासरं १७८ पुष्पवृद्धिर्धृतिःप्रीतिर्यशाःसौ
म्यंरतिःसुधा मरीचीःसुमनाच्छायारज्ञानातुष्टिरंगिरा१७९ सम्पूर्णमण्डलात्तेजोमालतीषोडशीकला प्रतिपत्तिथिमारभ्यसंचरत्या
सुचन्द्रमाः १८० ऌंबिनीचान्द्रिकाकांताक्रूराशानामहोदया भीषणीनंदिनीशोकासुपर्णाविमलेक्षणा १८१ शुभदाशोभना
पुण्याहंसस्यैताःकलाःक्रमात् एवमुक्तःसमाख्यातःफलनामानुरूपतः १८२ हंसएवमतःकालोजीवोऽयंसर्वदेहिनां अयं
सप्राणयोगेनब्रूतेसर्वंशुभाशुभं १८३ पंचवासरसंचारीमृत्युंवदतियोगिनः दिनानिषड्वहंव्याधिकृच्छ्रंसाध्यंमहीभुजः १८४
हयाहवहनोहंसोहन्तिवाहमतिद्रुतं अंतःपुरभयंब्रूतेदिनासप्तवहोमनुत् १८५ नंदाहवाहनःक्लेशंरौद्रमाख्यातिभूभुजःमृ
त्युंतत्रभयंब्रूतेदशारुद्रदिवावहः १८६ अर्काहवाहनोमात्यभयकामादिवावहः मान्त्रिभीतसमावास्तेवायुःसंक्राहसंचरः १८
७ दशनाशात्रिपंचाहवाहीब्रूतेमहाभयं चन्द्रवारेपिविज्ञेयमिदंसर्वंहिपूर्ववत् १८८ कक्षायास्फुरणेजीवेन्मासंनवनरोदराकू
र्परस्फुरणेशंखस्पंदनेष्ठौस्तनेबले १८९ यवानिमित्तबाधिर्य्येक्षीयतेतिथिवासरैः मासद्वयंनरोजीवेन्निःकंपोलिंगमर्माणि१
९० स्वस्थस्यांयदिपंचाहंवटिकाविगतद्रवाः सदिनानांशतंजीवेद्रोगीचेन्म्रियतेक्षणात् १९१ कन्दमूलेतुनिष्यन्देषण्मासंना
भिपंकजे चतुरःप्राणितिप्राणिवृषणस्फुरणद्वयं १९२ धमन्यस्फुरणेसप्तमासैकंजानुनोस्तथा मासानेकादशप्राणीस्फुरितेम
णिबन्धने १९३ विनारोगंगलन्नेत्रसमाहाद्व्रजतिध्रुवं पादोर्ध्वस्फुरणेपंचदिनैर्यातियमालयं १९४ अनिमित्तंचवाग्नाशेजी
वितंदिवसत्रयं दृष्टिहानौद्व्यहंजीवेगुल्फस्यस्फुरणेदिनं १९५ हृत्कंपेयामयुग्मंचयामंकण्ठनिरोधतः तालुनःकंपनेप्राणी
शतंजीवतिमानवः १९६ शिवोदितमिदंसर्वंसफलंप्राणयोगिना प्राणाभ्यासरतोवेत्तिकालंस्वस्यपरस्यच १९७ अधऊर्ध्वेतत
थापांगेकोणेबिंदुंनपश्यति भानोरसाग्निहस्तेन्दुमासान्जीवत्यसौनरः १९८ रविबिन्दुप्रदेशेशुचन्द्रबिन्दुर्नपश्यति प्राणिनांप्रा
णिनस्तस्यदंसेसुन्नींदुवासरान् १९९ भुजाद्वितीयमध्यस्थंलंबकंपःसमीक्षते उत्फुल्लेभग्नपत्रंवापंचत्वंतस्यपक्षतः २०० सरो

जकोरकाकारोकरयुग्मैकसंस्थिते लंबकंकरणंख्यातंकालज्ञानविधौबुधैः २०१ आस्यश्चुष्कंतथाहिक्कामात्मनोयेनपश्यति
स्वस्थोपितस्यसप्ताहान्मरणंजायतेकिल २०२ प्रातःसायंवहश्चन्द्रशुभःस्यादुत्तरायणे दाक्षायणेरविर्धत्तानुदितावसुभोमतो
२०३ तिर्यक्कृतेकरांगुष्ठेभ्रूमध्येयःसमीक्षते सूर्यचन्द्रप्रदीपंचसप्ताहात्सविनश्यति २०४ यस्यपादद्वयंवृष्टिनिःशब्दंरक्तवर्जि
तं तस्यशिरःसरक्तःस्याद्रेतोरात्रौविमूढता २०५ दुःस्वप्नंयःप्रबुद्धोपिपश्यत्यविरतंनरः सध्रुवंपंचतांयातिवर्षमध्येद्विवो
दितं २०६ अलीकंमण्डलंव्योम्नियःपश्यतिदिनेदिने सिद्धहरतिकृष्णांवावर्षान्मृत्युमवाप्नुयात् २०७ नश्रृणोतिश्रुतिघोषं
कृष्णादुर्गविशोणितं पीडापाणितलेशूलंजिह्वांतुदतिदारुणं २०८ वर्धतेनैवरोमाणिसूर्यचन्द्रंचनेक्षते षण्मासात्संक्षयंयाति
तथाईश्वरभाषितं २०९ कर्णरंध्रेकृतेगुष्ठेघोषोनश्रूयतेतदा मरणंतस्यजानीयात्षण्मासाज्जायतेध्रुवं २१० योनेक्षेतनरो
नासांनेत्रपुत्रीनलंबिकां सुध्यंपिबतिसप्ताहात्सगच्छेद्यममन्दिरं २११ इत्याध्यात्मविदांस्पष्टंनान्येषांगृहिणीयतः तदर्थेसु
समान्योगान्कियंतोपिवदाम्यहं २१२ मार्गशीर्षस्यशुक्लायामेकादश्यांजितेन्द्रियः आत्मनोवापरस्यार्थेकालागमदिदृक्ष
या २१३ उपवासेनवैकुंठोद्वादशाक्षरदेवता संलिख्यफलकेसायंमलयोद्भववारिणा २१४ हरिंरात्रौसमभ्यर्च्यप्रातःस्नाना
वलोकनात् दृष्टसम्पूर्णविद्यस्यकुशलंवत्सरावधि २१५ तस्यआद्यक्षराभावेमार्गशीर्षेगुरोर्दिने भूतायांचतिथौयाम्ये
प्रथमेयातिपंचता २१६ पुष्यस्यशुक्लपंचम्यांप्रातर्भानुदिनेज्वरात् विद्याद्वितीयवर्णस्यलोपेस्यान्मरणंध्रुवं २१७ पूर्णमा·
स्यांचमाघस्यभानुवारेपराण्हतः मघायांगुणवर्णस्यविनाशोज्वरतःक्षयः २१८ शुक्लायांफाल्गुनस्याथनवम्यामपराण्ह
तः शुक्रवारेज्वरान्नाशोविद्यात्तुर्याक्षरक्षये २१९ चैत्रेभूतदिनेभौमेसुप्रभातेविनश्यति अतिसारगतेवर्णेविद्याद्वेपंचमे
ध्रुवं २२० वैशाखस्यत्रयोदश्यांसितायांगुरुवासरे उत्पातान्क्षीयतेरात्रौविद्यान्नषाक्षरक्षये २२१ ज्येष्ठभूतदिनेमंदेनि
शायांप्रहरेगते शीफक्षयात्क्षयंयातितत्स्वराक्षरलोपतः २२२ आश्विनस्याथकृष्णायामाषाढेबुधवासरे मध्यान्हेवा

युरोगेणमृत्यरष्टमलोपतः॥ २२३ ॥क्षेपकाः॥श्रावणेशुक्लनवमीसोमेशैत्यप्रकोपतः नवमाक्षर लोमेनमृत्युरेव नसंशयः॥ २२४ ॥भाद्रशुक्लद
शम्यांवैप्रातःकालेकुजे हनि विशूचिकाप्रकोपेनमृत्युर्दशमलोपतः ॥२२५॥आश्विनेशुक्लपंचम्यांमध्यान्हेवायुरोगतःरुद्राक्षरविलोमेनमृत्यु-
योगोशनौभवेत्॥ २२६ ॥द्वादशाक्षरलोपेनकार्त्तिकेप्रथमेदले॥द्वादश्यांचगुरौप्रातः मृत्युरेवहरिंस्मरत्॥ २२७॥ ॥इतिवृ०मिश्र०स्वस्था
रिष्टाध्यायेप्रयोगरत्नमालोक्तकालज्ञानप्रकरणं॥ ५॥ ॥अथवैद्यकीयकालज्ञानं ॥ अथकालस्यविज्ञानंप्रवक्ष्यामियथाशुतं ॥
जीवितंमरणंयोगीयतोजानातिनिश्चयं॥ २२८ ॥कालग्रहस्ययस्येदंदंष्ट्रागसंपुटकेजगत्॥ अद्यैवसाप्रभातेवासोवस्यंभक्षइष्यति॥२२९
रसंरसायनंयोगंकालंज्ञात्वासमाचरेत्॥ तस्याज्ञाने वृथासर्वक्लेशएवविशिष्यते॥ २३० ॥दुतलक्षणं ॥ दुतोरक्तकषायकृष्णवसनोदंडिज
टीभुंडितस्तैलाभ्यक्तशरीरयुक्भयकरोदिनार्त्तपूर्णाननः ॥ भस्मांगारकपालपांशुमुशलीसूर्योस्थिसंव्याकुलिः॥पैशुन्यश्वरसंस्थितो
गदवतःकार्यायनस्याद्दसौ॥ २३१॥ रोगीलक्षणं ॥ अकस्माच्चित्तविकृतिरकस्मात्पुरुषोतमः ॥अकस्मादिंद्रियोत्पत्तिःसंन्निपातस्य
लक्षणं ॥ २३२ ॥शरीरंशीतलंयस्यप्रकृतिर्विकृतिर्भवेत्॥ तत्वस्थितंसमासेनव्यासतस्तन्निबोधमे॥ २३३ ॥द्विषछब्देतुरमतेशुद्धश-
ब्देषुकुप्यति॥ यश्चाकस्मानश्रृणोतिगतायुस्तस्यवक्ष्यते॥ २३४ ॥योवागंधंनगृण्हातिदीपेशांतेचमानवः॥ दिवाज्योतिंवियच्चापि
लक्षित्येवनपस्यति॥ २३५ ॥तटिद्वातेशितंवापिनिर्मलात्गगनादपि ॥विनाविमानप्रासादैर्यस्यसंकुलमंबरं॥ २३६ ॥विपरितेनगृ
ण्हातिभवानन्याश्चयोनरः॥धूमनीहारवासोभिरावृतामिवमेदनीं॥ २३७ ॥प्रदीसमिवलोकांश्चयोपश्यतिविशेषतः॥भूमिमच्छदिशाका
रंरेखाभिर्योनपश्यति॥ २३८ ॥पस्येदेकांगहीनंवाविकृतिंचान्यसत्वजं॥स्वकाककंकगृध्राणांप्रेतानांयक्षरक्षसां॥ २३९ ॥पिशाचो
रगयक्षाणांभूतानांविकृतामपि॥ ह्रींश्रींहूंनचपस्यतयस्यज्ञानंस्मृतिर्यथा॥ २४० ॥अकस्माज्जृंभतेयस्तुसपरायुरसंशयं॥यस्याधरो
ष्ठापततिस्थितंचोर्धस्तथोदरे॥ २४१॥ उभौवापावकाभासौदुर्लभंतस्यजिवितं ॥कुटिलास्फुटितावापिसुत्पायस्यचनासिका॥ २४२॥
भग्नाविस्फुटनेत्रोपिसपरायुरसंशयं॥ धाराबिंदुसमायस्यपतंतेचमहितले॥ २४३ ॥ससाहाज्जायतेमृत्युःकालःकालेनकथ्यते॥ जीवंवि

ध्रुपदत्रयंस्फरपदंसन्मातृका मंडलं तारापुंजमरुंधतिममृतगोशृंकंधृवंलक्षणं॥ एकैष्वेकमपिस्फुटंतुपुरुषःपस्येन्नयस्त्वीक्षितुंसोवस्यंव-
सतीहकालवदनेसंवत्सरादूरतः॥ २४४ ॥अरस्मिसूर्यबींबंचवन्हिशीतांशूशाइनः॥दृष्टेकादशमासानांनरचोर्ध्वनजीवति॥ २४५॥वायुंपुरी
षमूत्रंयःस्फवर्णरजतंतथा॥प्रत्यक्षमथवास्वप्नेदुशगमासंसजीवति॥ २४६॥ध्काचित्पस्यातिचादीप्पंसुवर्णवृषभाननं॥विरूपाणिचभूतानि
नवमासंसंजीवति॥ २४७॥स्थूलोगोपिकृशःकृशोपिसहसास्थूलत्वमालंबते॥ श्यामोवाकनकप्रभायदिभवेद्गौरोपिकृष्णाच्छविः॥शूरो-
भिरूरधीर्हिधर्मनिपुणोशांतोविकारीपुमानित्येवंप्रकृतेस्वरूपचलनंमासाष्टतोमृत्यदं॥ २४८ ॥पीडाभवेत्पादतलेचजिह्वामूलंसमूलं
रुचिरंचकृष्णं॥वृद्धिंनरोमणामपियत्रदृष्टाजीवेतमनुष्यःसहिसप्तमासान्॥ २४९ ॥मध्यंगुलीनांत्रितयंनवक्रंरोगेनविशष्यति-
यस्यकंठः॥मुहुर्मुहुश्रवणंचजाडयंषडिभःसमासैःप्रलयंप्रयाति॥ २५० ॥यस्यनास्फुरणांकिंचिद्विद्यतेतनुधारिणः॥सोवस्यंपंचमे
मासेस्कंधास्रूढोगमिष्यति॥ २५१॥यस्यनस्फुरतिज्योतिःपिडितेनयनद्वये मरणंतस्यनिर्दिष्टंन्वतुर्थेमासिनिश्चितं॥ २५२॥
पततेवृषणौयस्यनकिंचिदपिपीडीतं॥त्रितियेमासिसोवश्यंयमलोकंगमिष्यति॥ २५३ ॥ताराद्दिवादिक्षरजोनिपातंयोविद्युतःप
स्यतिरवंनिरभ्रे॥इंद्रा युधंवास्वयमेवरात्रौमासद्वयंतस्यवदंतिनाशं ॥२५४॥यस्यजानुगतंमर्मनकिंचिदपिचेष्टितं॥मासांते-
मरणंतस्यनकेनापिविलंध्यते॥ २५५ ॥कनिष्टंगुलिपूर्वाणिकृष्णास्याम्मध्यमायया॥तदायुःप्रोच्यतेपुंसामष्टदशादिनावधि२५६
घृतेतैलेजलेवापिदर्पणेयस्तुपस्यति॥ शिरोरहितमात्मानंपक्षमेकंसजीवति॥ २५७ ॥शैत्यंविदध्यात्तपनोपियस्यसंतापकारीनतु-
शीतरस्मिः॥नवेत्तियोवातिहिमंनचोष्णंसपक्षमेकंखलुतीष्ठतीह॥ २५८ स्नातमात्रस्यपस्यैतेत्रयः शुष्यंतितत्क्षणात्॥हृदयंह-
स्तपादौचदशरात्रंसजीवतिः॥ २५९ ॥नासाग्रंरसनाग्रंचचक्षुश्चैवोष्टसंपुटं॥योनपृष्टेत्परादृष्टंसससरात्रंसजीवति॥ २६०॥स्वरू
पंपरनेत्रस्थंपुत्रिकायांनपश्यति॥तदापिनियतादृष्टिस्तदामृत्युःरदूरतः॥ २६१॥ इतिकालज्ञानं॥ इति बृ०मिश्र०प्रकरणं ६॥
॥अथमृत्युंजयप्रयोगः॥ ॐअरुंधतिनमोगंगाध्रुवंविष्णुपदत्रयं॥ मातृमण्डलमेतानिपश्यंतिनगतायुषः॥ २६२॥ इंद्रियाणांवि-

पर्य्यासोधातूनांचविपर्य्ययः ।।गुणानामात्मनाभावोमृत्योरासन्नसूचकाः २६३ ।। चिंत्त निरुध्दत्हृत्पद्मकर्णिकायांशिवंस्मरन् ।। मृ-
त्यु नाभुच्यतेयोगीतन्नूंप्राप्नोतिशाश्वतीं ।। २६४ ।।वायुस्थानेमनोदत्वायःपिबंत्वांबिकामृतं ।। तस्यव्याधिजरामृत्युःसमीपंनेति क-
र्हिचित् ।।२६५ ।।अथऊर्ध्वेशितांभोजद्वयमध्यास्थितोजपेत् ।। मृत्युंजयंसुधापूर्णंदेहकालंनिवारयेत् ।। २६६ ।। ॐ जुंसः मृत्युं
जयायनमः ।। सर्वाधारेनिराकारेकालशून्येपदेपुमान् ।।स्थिरचित्तोध्रुवंकालंवंचयत्यागमक्षणात् ।। २६७ ।।पंचमण्डलमध्यस्थो
मातृकारवेबहिर्वृतः ।।दुष्टविघ्नजराव्याधिमृत्युभिर्नाभिभूयते ।। २६८ ।।एवंकालवंचनं कुर्याद्यातिरितिकालडिंडिमसंहितोक्तं का-
लेर्थवंचितोयोगीकवीस्त्वंयदिवांछति ।। २६९ ।।तस्मैभारस्वतान्योगान् कियंतोवच्मिसांप्रतं ।। अग्र्यंभोमध्यगंविंदौब्रह्मग्रंथौ
स्मरंसदा ।। २७० ।। ज्ञात्वासमस्तशास्त्राणांकविराजोभवेन्नरः ।। ब्रह्मग्रंथिश्चतुर्धोक्ताविद्यामुद्राणुमण्डलं ।। २७१ ।। संकीर्णोद्विद्व-
जः शुध्दः उपदेशास्त्रिधामताः ।। शक्यवारेणशुध्दंस्यात् द्वंद्वजः शक्ति मंत्रजः ।। २७२ ।। संकीर्णेजायतेत्यंतमुवाराभासतस्तयोः ।।
स्हैमितिब्रह्मग्रंथिःपवनोर्ध्वपदेलीनोजरामरणवर्जितः ।। २७३ ।।अचिराज्जायतेयोगात् कविश्रीशंभुभाषितं ।। हृत्पद्मेशिवंमं
न्यायलिलावाग्भवसंस्मरे ।। २७४ ।।ब्रह्मरंध्रेतुतध्यानान् कवित्वंजायतेभ्दुतं ।। ह्रौंशिवमंत्रः स्हैं वाग्बीजं दूतीचतुष्टयोपेतंसा
रतीयोजपेत्सुधीः ।। २७५ ।।कवित्वंजायतेतस्यसर्वभाषास्कपेशलं ।।प्रज्ञामेधा ।। मैत्रीत्वरितादूतीचतुष्टयं ।। २७६ ।। ॐ ह्रींवद
२ वाग्वादिनिसरस्वत्यैनमः ।। ॐ ऐं ह्रींवद २ वाग्वादिनीत्वरिताविद्यासरस्वतीनमः ।।स्वाहा इतिवा कूटंवाचिंतयतेत्विन्ना-
अशक्ताकालवंचने ।। युक्तव्युत्क्रमणंतेषांतत्समासान्निगद्यते ।। २७७ ।।चरणान्मस्तकंयावत्कूटमंत्रंसमाहितः विन्यस्यत्हृदये
ध्यात्वाप्रज्वलद्वह्निसन्निभं २७८ ।। कूटमंत्रः अधश्चक्रंचपीडयहिक्कांकृत्वप्यलीलया ।। कुर्यादुत्क्रमणंयोगीब्रह्मरंध्रसुवर्ण
ना ।। २७९ ।।बध्दपद्मासनंनाभौमंत्रंसंचिंत्यभास्वरं ।। गुदमापिडयहिक्कांचकृत्वोर्ध्वंनिःस्मरेद्बुधः ।। २८० ।।चिंतयन्नव्ययंदे
वंगुदमापीडययोगवित् ।। हिक्कांबध्वाथयोगेननिःसरेद्देहगेहतः ।। २८१ ।। ॐ गुदेक्षौंतथालिंगेषौंनाभौसौंतथामुखे ।। वौंनासा

पुटद्वयेल्लौंततोन्यतमेपुटे॥ २८२॥दक्षिणेनयनेवीजंयौंरौंकारंचवामतः॥सौंबीजंदक्षिणकर्णेवामषौंभ्रूकगांतरे॥ २८३॥हौंकारं
न्यस्यबिजानिप्रदद्यात्सव्यपाणिनासंहारेणकपाटानिशक्तियंत्रपदेपदे॥ २८४॥विन्यस्याथकपाटानिसार्गलांमृषियोगतः॥गुदा
तंभ्रूयुगांदेयास्त्वत्त ॐभ्रूयुगांतरे॥ २८५॥औंकाराकारमाधायचक्षुषोर्वामदक्षयोः॥ क्षौमृकाशौचविन्यस्यकर्णेवामेचदक्षिणे॥
२८६॥वामेनासापुटेभास्यंयकारंदक्षिणेपुटे॥ ओकारंवदनेविद्वान्षकारंनाभिपंकजे॥ २८७॥विलिंगेरंगुदेप्रोक्तोअंगला-
व्यापकंपुनः॥सकारःसर्वतोदेवोब्रह्मरंध्रंविधायच॥२८८॥रोमकूपेषुविन्यस्यशक्तिंविद्वावविष्टपं॥ एवंन्यसेत्क्रतेहिक्कांयाव
न्वायुंनिपीडयेत्॥ २८९॥ऊर्ध्वरंध्रंविभिद्यात्मादेहगेहंविमुंचति॥ ब्रह्ममष्टदलंकृत्वाभस्मनाकर्णिकांतरे॥ २९०॥क्षुरिका-
स्त्रंसमारभ्यप्रज्वलंवन्हिसन्निभं॥हूंबीजंमारुतंपत्रेफट्कारंवन्हिपल्लवे॥ २९१॥स्वदेहेपूजयेन्मंत्रंनाभिभ्रूकंठमस्तके॥त्हृदि
मंत्रंस्कविन्यस्यप्रज्वलत्पावकोपमं॥ २९२॥जानुपादयुगेहूंफट्पुटितंनामयोजयेत्॥ लभतेचाक्षयाल्लोकान्इहलोकेनिराम
यान्॥२९३॥क्षौंहूंफट्क्षुरिकास्त्रं॥प्र श्रयार्थेकृतेन्यासेवैकल्पंयदिजायते॥ शमयेत्कर्णिकारस्यपुष्पलेपेनमंत्रवित् २९४
अथवान्यप्रकारेणवदाम्युत्क्रमणंयथा॥ स्त्रिभिंद्रियेगुदेक्षौंचब्रह्मरंध्रेसबिंदुकः॥ २९५॥क्षकारोमलपुंसस्थःकर्णयोर्वामदक्ष
योः॥क्ष्रूंहूंचलोचनेक्षौंहंवामदक्षिणयोगतः॥ २९६॥ललरूंसंस्थितोनासापुटयोर्वदनेस्त्वयंक्षादिकटास्थितोमूर्ध्निन्यासोयंमृ
त्यकारकेः॥ २९७॥क्ष्म्ल्यूंकादि इत्यत्क्षांतर्विधिःप्रोक्त श्रीमच्छ्रीकंठशंभुना॥ यथाविधियथादृष्टःसिद्धांतेतिसमासतः॥
२९८॥कालज्ञानंतदाजातंवचनान्यवनौतथा॥प्रदेशवेषइत्येतिप्रसन्नेलभ्यतेशिवे॥ २९९॥ ॥इतिश्रीह०बृ०मि०स्व
स्थारिष्टाध्यायेमृत्युंजयप्रयोग निरूपणंनाम प्रकरणं॥ ७ ॥ ॥अथविधानमालामार्कंडेयपुराणोक्तंस्वस्थारिष्टविधानं॥
क्रोष्टुकिंप्रतिमार्कंडेयउवाच॥ स्वस्थारिष्टंप्रवक्ष्यामिदत्तात्रेयेणभाषितं॥अलर्कायययथाप्रोक्तंमदालसस्कृतायवै॥ ३००॥श्रृणु
राजेंद्रवक्ष्यामिस्वस्थारिष्टविनाशनं॥विधानंचसमासेनयत्कृतंदुरितंहरेत्॥ ३०१॥देवमार्गध्रुवंशुक्रंसोमछायामरुंधतीं॥

अगस्त्यमित्चलश्चापिपुष्यलाराद्धिदेवतं॥ ३०२ ॥अकस्माद्यस्यकस्यापिनभवंत्यक्षिगोचराः॥ तस्यमृत्यः समीपेस्तिनात्रकार्याविचारणा॥ ३०३ ॥निजंनासाग्रमत्यच्चमधोदृष्ट्यावित्नोकयेत् ॥ नपश्यातितदामृत्युंविजानीयान्नसंशयः॥ ३०४ ॥न्युब्जानु मध्यमाकृत्वानिधायनिजसक्थिनी ॥उन्नम्यनासिकांपश्येत्स्वस्थरिष्टंविचक्षणः॥ ३०५ ॥उक्षिसांचोध्दरेत्सानुतदामृत्युर्नसंशयः॥ तत्रशांतिंप्रकुर्वीतमयाप्रोक्तांनिबोधत॥ ३०६ ॥यानिप्रोक्तानिमेतातस्वस्थारिष्टानिकानिचित् ॥ तेषुकिंचिभ्दवेद्दृष्टस्तत्र शांतिर्विधीयते॥ ३०७ ॥विधायमंडपंरम्यंचतुरस्त्रंसुशोभनं ॥ स्तंभैःषोडशभिर्युक्तंचतुर्द्वारंसुलक्षणं॥ ३०८ ॥ कोटिहोमंलक्षहोमंमकतारव्यंसमाहितः ॥हवनंकारयेध्दिमानुत्पन्नारिष्टशांतये॥ ३०९ ॥त्रियंबकेणमंत्रेणगायत्र्यावासमाहितः॥प्रधानंपायसंसाज्यंपालाशीसमीधस्तथा॥ ३१० ॥ऋहुयात्प्रयतोभूत्वासहस्त्रंनात्रसंशयः ॥ तिलव्रीहियवैश्चापिलोकपालयजिःस्मृता ३११ ॥गाणपत्यंतुविधिवत्फलैस्तुकदलादिभिः ॥ प्रत्येकंतुसहस्त्रंचशतंवाशक्त्यपेक्षया॥ ३१२ ॥देवतायाःप्रधानत्वमंत्रप्रोक्तंमनीषिभिः॥ मृत्युंजयस्यनान्यस्यस्वस्थारिष्टविनाशिनः॥ ३१३ ॥जपेध्दांतिसूक्तशैवानिस्तोत्राणिविविधानिच ॥ ततस्तुमूर्त्तिदानंचदद्याद्धिप्रायचात्मनः॥ ३१४ ॥पलेनवातदर्धेनतस्याप्यर्धेनवापुनः॥ सौवर्णास्वतनुंकृत्वावस्त्रयुग्मेनवेष्टितां ३१५ तिलानांराशिमाधायतत्रतांविनिवेशयेत् पूजयेद्गंधपुष्पाद्यैरुपहारैर्मनोरमैः॥ ३१६ ॥पौराणैरेवमंत्रैश्चसामूर्त्तिरुपचर्यते॥ आचार्यायततोदद्याद्दक्षिणासहितांशुभां॥ ३१७ ॥मृत्युंजयस्यदेवस्यपीठंसंपूज्यविग्रहं ॥ तंचापिविप्रवर्यायदद्याच्चैवसदक्षिणं॥ ३१८ ॥तत्रमंत्रः॥स्वस्थारिष्टसमुभ्दूतंविघ्नंनाशयशंकर ॥ निजमूर्त्तिप्रदानेनमृत्युंजयसमागतं॥ ३१९ ॥ इतिमृत्युंजयदानमंत्रः॥ आचार्यवेदविप्रज्ञसर्वशास्त्रविशारद ॥ दानेनममचानेनविघ्नाद्रक्षमहामते ॥ ३२० ॥स्वमूर्त्तिदानमंत्रः॥ ततस्तुभोजयेद्विप्रान्सहस्त्रंचशताधिकं ॥ वस्त्रालंकारसहितंयथाशक्तिसदक्षिणं॥ ३२१ ॥ एवंकृतेविधानेचस्वस्थारिष्टंविनश्यति॥ ॥इति० ह०बृ०मि०स्वस्थारिष्टविधानंनाम प्रकरणं॥ ८ ॥ अथशिवपुराणोक्तकालज्ञानं॥उक्तंशैववायुसंहितायां पूर्वभागे वायुरुवाच॥ यदलंघ्यमशेषस्यस्था-

बरस्यचरस्यच॥ नियोगरूपमीशस्यबलंविश्वनियामकम्॥ ३२२ ।तस्यांशांशमयीशक्तिःकालात्मनि महात्मनि ॥ततोनिष्क्र
म्यसंक्रांताविसृष्टाग्नेरिवाऽऽयसी॥ ३२३ ।तस्मात्कालवशेविश्वंनसविश्ववशेस्थितः॥ शिवस्यतु वशेकालोनकालस्यवशेशिवः
॥३२४॥यतोऽप्रतिहतंशार्वंतेजःकालेप्रतिष्ठितम् ।महतीतेनकालस्यमर्यादाहिदुरत्यया॥ ३२५ ॥ कालंप्रज्ञाविशेषेणको
ऽतिवर्त्तितुमर्हति॥ कालेनतुकृतंकर्म नकश्चिदतिवर्तते॥ ३२६॥एकच्छत्रांमहींकृत्स्नांयःपराक्रम्यशास्ति ।सोपिनै
वातिवर्तेतकालंवेलामिवोदधिः॥ ३२७ ।येनिगृत्ध्येंद्रियग्रामंजयंतिसकलंजगत् ॥नजयंत्यपितेकालंकालोजयतितां
नपि॥ ३२८ ॥आयुर्वेदविदोवैद्यास्त्वनुष्ठितरसायनाः॥ नमृत्यमतिवर्तंतेकालोहिदुरितक्रमः॥ ३२९ ॥श्रियारूपेण
शीलेनबलेनसकलेनच ॥ अन्यच्चिंतयतेजंतुःकालोऽन्यत्कुरुतेबलात् ॥ ३३० ॥अप्रियैश्चाप्रियैश्चैवअचिंतितगमागमैः
॥संयोजयतिभूतानिवियोजयतिचेश्वरः ॥ ३३१॥यदेवदुःखितःकश्चित्तदेवस्रखितःपरः॥दुर्विज्ञेयस्वभावस्यकाल-
स्याहोविचित्रता॥ ३३२ ।योरुवास्मभवेद्धुरधोयोबलीयान्सदुर्बलः॥यःश्रीमान्सोपिनिःश्रीकश्चित्रःकालविपर्ययः॥
॥३३३॥ नाभिजात्यंनवैशीलंनबलंनचनैपुणं ॥भवेत्कार्यायपर्याप्संकालश्चेत्प्रतिरोधकः॥ ३३४ ।येचनिष्पर्षैस्तुयैर्गी-
तवाद्यैरुपास्थिताः॥येचानाथाःपरान्नादाःकालस्तेषुसमक्रियः॥ ३३५ ।फलंत्यकालेनरसायनानिसम्यक्प्रयुक्तान्य
पिचौषधानि ॥तान्येवकालेनसमाहृतानिसिद्धिंप्रयांत्याशुसुखंदिशंति ॥ ३३६॥ नाकालतोयंम्रियतेजायतेवानाका
लतःपुष्टिमथ्यामुपैति ॥ नाकालतःसुखितंदुःखितंवानाकालिकंवस्तुसमस्तिकिंचित् ॥ ३३७ ।कालेनशीतःप्रतिवा-
तिवातःकालेनवृष्टिर्जलदानुपैति ॥कालेनसस्यानिभवंतितस्मात्कालेनसंजीवतिजीवलोकः॥ ३३८ ॥इत्थंकालात्म-
नस्तत्त्वंयोविजानातितत्त्वतः॥ कालात्मानमतिक्रम्यकालातीतंसपश्यति॥ ३३९ ॥ तत्रैव धर्मसंहितायां दे०युवाच अ-
थापिसंशयोत्थ्येकःकालचक्रंप्रतिप्रभो॥ मृत्युचिन्हंयथादेवकिंप्रमाणंतथायुषः॥ ३४०॥तथाकथयमेनाथयद्यहंतववल्लभा ॥ई-

॥ ईश्वरउवाच ॥ सत्यंतेकथयिष्यामियेनकालः प्रबुध्यते ॥ ३४१ ॥ अहःपक्षंतथामासमृतुंचायनवत्सरम् ॥ स्थूलसूक्ष्मगतैश्चिन्है
र्बहिरंतर्गतैस्तथा ॥ ३४२ ॥ तत्तेहंसंप्रवक्ष्यामिश्रृणुतत्वेनसुंदरि ॥ अकस्मात्पांडुरंदेहमूर्ध्वरागंसमंततः ॥ ३४३ ॥ मुखंकर्णौतथा-
चक्षुर्जिव्हास्तंभोयदाभवेत् ॥ तदामृत्युंविजानीयात्षण्मासाभ्यंतरंप्रिये ॥ ३४४ ॥ रौरवानुगतंभद्रेध्वनिंनाकर्णयेद्द्रुतम् ॥ षण्मासाभ्यं
तरंमृत्युर्ज्ञातव्यःकालवेदिभिः ॥ ३४५ ॥ रविसोमाग्निसंयोगाद्यदोद्योतंनपश्यति ॥ कृष्णंसर्पसमस्तंचषण्मासंजीवतितथा ॥ ३४६
वामहस्तोयदादेविसप्ताहंस्पंदतेप्रिये ॥ उन्मीलयंतिगात्राणितालुकंशुष्यतेयदा ॥ ३४७ ॥ जीवितंतुतदातस्यमासमेकंनसंशयः
नासातुस्त्रवतेयस्यत्रिदोषेपक्षजीवितम् ॥ ३४८ ॥ वक्त्रंकंठश्चशुष्येतषण्मासांतेगतायुषः ॥ स्थूलाजिव्हाभवेद्यस्यद्विजाःक्लिद्यंति
भामिनि ॥ ३४९ ॥ षण्मासाज्ज्ञायतेमृत्युश्चिन्हैस्तैरुपलक्षयेत् ॥ अंबुतैलघृतस्थंतुदर्पणेवरवर्णिनि ॥ ३५० ॥ पश्यतेनयदात्मानं
विकृतंस्थूलमेवच ॥ षण्मासायुःसविज्ञेयःकालचक्रंविजानता ॥ ३५१ ॥ शिरोहिनांयदाछायांस्वकीयामुपलक्षयेत् ॥ अथवाछायया-
हीनंमासमेकंनजीवति ॥ ३५२ ॥ आंगिकाःकथिताभद्रेबाह्यस्थांश्चशृणुसांप्रतम् ॥ रश्मीहीनंयदादेविसोमार्कमण्डलद्वयम् ॥ ३५३ ॥
दृश्यतेपटलाकारंमासार्द्धेनविपद्यते ॥ अरुंधतीमहायानमिंदुलांछनवर्जितम् ॥ ३५४ ॥ सोपिजीवतिवर्षार्द्धंतथावादृष्टतारकाः ॥
मेघहीनंयदादेविविद्युद्भिर्ज्वलितंनभः ॥ ३५५ ॥ दृष्टेगृहेचादिक्मोहःषण्मासाज्ज्ञायतेध्रुवम् ॥ रात्रौधनुर्यदापश्येन्मध्यान्हेचोल्क
पातनम् ॥ ३५६ ॥ वेष्ट्यतेगृध्रकाकैश्चषण्मासायुर्नसंशयः ॥ ऋषयःस्वर्गपंथाश्चनैवदृश्येतचांबरे ॥ ३५७ ॥ षण्मासायुर्विजानी
यात्पुरुषैःकालवेदिभिः ॥ अकस्माद्राहुणाग्रस्तंसूर्यंवासोममेवच ॥ ३५८ ॥ दिक्चक्रंभ्रांतवत्पश्येत्षण्मासान्म्रियतेस्फुटम् ॥ म-
क्षिकैर्नीलवर्णाभैरकस्माद्वेष्ट्यतेपुमान् ॥ ३५९ ॥ जीवतेमासमेकंतुज्ञातव्यंपरमार्थतः ॥ गृध्रःकाकःकपोतश्चशिरश्चाक्रम्यतिष्ठ
ति ॥ ३६० ॥ शीघ्रंतुम्रियतेजंतुर्मासैकेननसंशयः ॥ एवंत्वरिष्टभेदंतुबाह्यस्थंसमुदाहृतम् ॥ ३६१ ॥ आयुधानांहितार्थायसंक्षे
पेणवदाम्यहम् ॥ हस्तयोरुभयोर्देवियथाकालंविजानते ॥ ३६२ ॥ वामदक्षिणयोर्भद्रेप्रत्यक्षंतेवदाम्यहम् ॥ वामंशुक्लंविजानीया-

दक्षिणंकृष्णसंज्ञितम् ॥ ३६३ ॥दक्षिणंसूर्यमित्याहुर्वामश्चंद्रउदाहृतः ॥एवंपक्षौस्थितौद्वौतुसमासात्करसुंदरि ॥ ३६४ ॥शुचिर्भूत्वा-
स्मरेद्देवस्नातःसंयतेंद्रियः ॥हस्तौप्रक्षाल्यक्षीरेणालक्तकेनतुमर्दयेत् ॥ ३६५ ॥गंधैःपुष्पैःकरौकृत्वामृगयेच्चशुभाशुभं ॥कनिष्ठामादितःकृ-
त्वायावदंगुष्ठकंप्रिये ॥ ३६६ ॥पर्वत्रयक्रमेणैवहस्तयोरुभयोरपि ॥प्रतिपदादिविन्यस्यतिथिंप्रतिपदादितः ॥ ३६७ ॥संपुटाकारहस्तौतुपू-
र्वादिमुखसंस्थितः ॥स्मरेन्नवार्णकंमंत्रंयावदष्टोत्तरंशतम् ॥ ३६८ ॥निरीक्षयेत्ततोहस्तौसर्वपर्वणियत्नतः ॥ तस्मिन्पर्वणितद्रेखादृश्य-
तेभृंगसन्निभा ॥ ३६९ ॥तत्तिथौमृत्युर्विज्ञेयःकृष्णेशुक्लेतथाप्रिये ॥निश्चितंमरणंतस्यकालचक्रस्यकीर्त्तितम् ॥ ३७० ॥अधुनानादजं
वक्ष्येसंक्षेपात्काललक्षणम् ॥गमागमंविदित्वातुकर्मकुर्याच्छृणुप्रिये ॥ ३७१ ॥आरमविज्ञानंसुश्रोणिचारंज्ञात्वातुलक्षतः ॥क्षणंत्रुटिर्ल-
वंच्यैवनिमेषंकाष्टकालिकम् ॥ ३७२ ॥मुहूर्तकंत्वहोरात्रंपक्षमासर्तुवत्सरम् ॥ अब्दंयुगंतथाकल्पंमहाकल्पंतथैवच ॥ ३७३ ॥एवंसंह-
रतेकालःपरिपाठ्यासदाशिवः ॥ वामदक्षिणमध्येतुपथित्रयमिदंस्मृतम् ॥ ३७४ ॥दिनानिपंचचारभ्यपंचविंशद्दिनावधि ॥ वामचार-
गतोनादःप्रमाणंकथितंतव ॥ ३७५ ॥भूतरंध्रदिशश्चैवध्वजश्चवरवर्णिनि ॥ वामचारगतोनादःप्रमाणंकालवेदिनः ॥ ३७६ ॥ऋतु-
विकारभूताश्चगुणास्तत्रैवभामिनि ॥प्रमाणंदक्षिणंप्रोक्तंज्ञातव्यंप्राणवेदिभिः ॥ ३७७ ॥भूतसंख्यांयदाप्राणोवहतेचइडादयः ॥वर्ष-
त्रयंतदातस्यजीवितस्यनसंशयः ॥ ३७८ ॥ दिनादशप्रवाहेनद्वावब्दानिसजीवति ॥पंचदशप्रवाहेन अब्दमेकंगतायुषः ॥ ३७९ ॥विं-
शद्दिनप्रवाहेनषण्मासंलक्षयेत्तथा ॥पंचविंशद्दिनानांतुवहतेवामनाडिका ॥ ३८० ॥जीवितंतुतदातस्यमासत्रयगतायुषः ॥षड्विंशद्दिन-
मानेनमासद्वयगतायुषः ॥ ३८१ ॥सप्तविंशद्दिनानांतुवहतेत्वतिविश्रगा ॥मासमेकंसमाख्यातजीवितंवामगोचरे ॥ ३८२ ॥एतत्प्रमाणं
विज्ञेयंवामवायुप्रमाणतः ॥सव्यंतुरेदिनान्येवचत्वारअनुपूर्वशः ॥ ३८३ ॥चतुःस्थानेस्थितादेविषोडशैताःप्रकीर्तिताः ॥तेषांप्रमाणंव-
क्ष्यामिअधुनाहिहितार्थतः ॥३८४षड्दिनान्यादितः कृत्वासंख्यायाश्चयथाविधि ॥ एतदंतर्गतंकालंवामरंध्रेप्रकाशितम् ॥ ३८५ ॥षड्-
दिनानियदारूढंवर्षद्वयंसजीवति ॥ मासान्यष्टौविजानियाद्दिनान्यष्टादशानितु ॥ ३८६ ॥प्राणःसप्तदिनेदेविवर्षद्वयंनसंशयः ॥सप्तमासा

न्विजानीयाद्दिनैःषड्भिर्गतायुषः ॥ ३८८ ॥अष्टौदिनप्रभेदेनवर्षद्वयंसजीवति ।।मासांश्चत्वारि विज्ञेयंचतुर्विंशद्दिनावधि॥ ३८९ ॥ नवदिना
न्नियदाप्राणावहतितत्त्रिमासकम् ॥मासद्वयंचद्वेमासेदिनाद्वादशकीर्तिताः॥ ३९० ।पूर्ववत्कथितायेतुकालंतेषांनपूर्वके ॥आवांतर-
दिनायेतुतेसमासेनकथ्यते ॥ ३९१ ।एकादशप्रवाहेनवर्षमेकंनजीवति ।।मासानवतथाप्रोक्तादिनाअष्टदिनावधि॥ ३९२॥द्वाद-
शाहेप्रवाहेनवर्षमेकंगतायुषम् ॥मासान्सप्तविजानीयाद्दिनषट्कमुदाहृतम् ॥ ३९३॥ यदाचवहते नाडीत्रयोदशदिनावधि॥संवत्स
रंभवेत्तस्यमासाश्चत्वारि किर्तिताः॥ ३९४ ।चतुर्विंशद्दिनाः शेषाजीवितंचनसंशयः॥ प्राणवाहोयदावामेचतुर्दशदिनानितु॥ ३९५
द्वादशाह प्रवाहेन द्विमासंजीवितंखलु ॥ द्वितियंतुचतुर्थेनअंतरालदशांतरे॥ ३९६ ।तृतीयंचसमासेनकालचक्रंवदाम्यहम् ।षोडशा
हप्रवाहेननवमासैर्गतायुषम्॥ ३९७॥ दिनाअष्टादशतत्रकथितंसाधकेश्वर॥ वामचारंयदादेविअष्टादशदिनावधि॥ ३९८॥जी-
वितं अष्टमासंतुदिनाद्वादशकीर्त्तिताः॥चतुर्विंशद्दिनास्तत्रनिश्चयेनावधारय ॥ ३९९॥प्राणवाहोयदावामेत्रयोविंशद्दिनावधि॥
मासाश्चत्वारोविज्ञेयाषडदिनानितथोत्तरे॥ ४०० ॥चतुर्विंशप्रवाहेनमासत्रयंसजीवति॥ दिनास्तत्रदशाष्टौचसंहरत्यविचारतः ४०१
अवांतर दिनाये तुसंक्षेपोऽप्रकटीकृताः ॥ वामचारंसमारभ्यातंदक्षिणंश्रृणुसांप्रतम्॥ ४०२ ॥अष्टाविंशप्रवाहेन तिथिमानेनजीवति
प्रवाहेनदशाहेनतत्संख्येनविपद्यते॥ ४०३ ॥त्रिंशावाहप्रवाहेनपंचाहेनविनश्यति॥ एकत्रिंशद्यदादेविवहतेचनिरंतरम् ॥ ४०४ ॥
दिनत्रयंतदातस्यजीवितस्यनसंशयः॥ दक्षिणंकथितंप्राणंमध्यस्थंकथयामिते॥ ४०५ ॥एकभावगतोवायुप्रवाहोमुखंमण्डलो
धममानः प्रवाहेतुदिनमेकंसजीवति॥ ४०६ ॥चक्रमेतत्परासोऽर्हिकालचक्रमुदाहृतम् ॥ एतत्तेकथितंदेविकिमन्यच्छ्रोतुमिच्छसि
॥४०७॥ देव्युवाच॥ कथितंतुत्वयादेवकालज्ञानंयथार्थतः॥ कालस्यवंचनंब्रूहियथातत्त्वेनयोगिनः॥ ४०८ ॥कालस्तुसंनि-
कृष्टोहिवर्ततेसर्वजंतुषु ॥ यथाचास्यनमृत्यश्चवंचतेकालमागतम् ॥ ४०९ ॥तथाकथयमेदेवहितार्थमिहयोगिनः॥ शंकरउवाच
श्रृणुदेविप्रवक्ष्यामियत्त्वयापृच्छितेत्वहम् ॥ ४१० ॥कथयामिसमासेनमानुषाणांहितार्थतः॥ पृथिव्यापस्तथातेजोवायुराकाशमेव च

।एतेषांहिसमायोगःशरीरंपांचभौतिकं ॥ आकाशस्तुपरोव्यापिसर्वेषांसर्वगःस्थितः॥ ४११ ॥आकाशेतुविलीयंतेसंभवंतिपुनस्ततः।वि
योगेतुसदेकस्यस्वंधामप्रतिपेदिरे॥ ४१२ ।ततोस्यस्थिरताचास्तिसंनिपातस्यसुंदरी ॥ ज्ञानिनोपितथायत्नात्तपोमंत्रबलाद्यदि४१३
देव्युवाच ॥ श्वेतंनयन्नत्द्यतिघोररूपःकालःकरालस्त्रिदिवेशनाथ ।।दग्धस्त्वयात्वंपुनरेवतुष्टःस्तोत्रैःस्तुत्वात्वांप्रकृतिंसलंभे ॥ ४१४॥
त्वयासचोक्तःकृपयाजनानामदृष्टरूपःप्रचरिष्यसीति ॥ दृष्टंत्वयात्तन्निखिलंमयाहिप्रभोवरात्तेपुनरुत्थितंच॥ ४१५॥ तदद्यभोःका-
लइहास्तिकिंचिद्धिहन्यतेयेनवदस्वतन्मे॥ शंकरउवाच ॥नहन्यतेदेववरैस्तुदैत्यैःसयक्षरक्षोरगमानुषैश्च॥ ४१६॥ येयोगिनोध्या
नपराःसदेहाभवंतिसेघ्नंतिसुखेनकालं॥ ४१७॥ सनत्कुमारउवाच ॥एतच्छ्रुत्वात्रिभुवनगुरोःप्राहगौरीविहस्यसत्यंत्वंमेवदकथम
सौहन्यतेयेनकालः॥ शंभुस्तामाहशशिवदनेयोगिनोयेक्षयंतिकालंजातंसकलमनघास्तच्छृणुष्वैकचित्ता॥ ४१८ ॥ शंकरउवाच॥
पंचभूतात्मकोदेहःसदायुक्तस्तुतद्गुणैः॥ उत्पद्यतेवरारोहेतद्विलीनेर्हिपार्थिवैः॥ ४१९ ॥आकाशाज्जायतेवायुर्वायोस्तेजश्चजा-
यते॥ तेजसोंबुविनिर्दिष्टंतस्माद्धिपृथिवीभवेत्॥ ४२० ॥पृथिव्यादीनिभूतानिगच्छंतिक्रमशोवरं॥ धरापंचगुणाप्रोक्ता आपश्चैव
चतुर्गुणाः॥ ४२१ ॥त्रिगुणंचतथातेजोवायुर्द्विगुणएवच ॥शब्दैकगुणमाकाशंपृथिव्यादिषुकीर्त्तिताः॥ ४२२ ॥शब्दःस्पर्शश्चरूप
पंचरसोगंधश्चपंचमः॥ विजहातिगुणंस्वंस्वंतदाभूतंविपद्यते॥ ४२३ ॥यदागुणंविगृण्हातीप्रादुर्भूतंतदुच्यते ॥ तस्माद्धियोगिना
नित्यंस्वकायाकाशजागुणाः॥ ४२४ ॥चिंतनीयाःप्रयत्नेनदेविकालजिगीषुणा ॥ देव्युवाच ॥ कथंहिजीयतेकालोयोगिभिर्मेवदे
श्वर॥ ४२५ ॥ध्यानेनजाप्यमात्रेणतत्सर्वंकथयप्रभो॥ शंकरउवाच ॥ शृणुदेविप्रवक्ष्यामियोगिनांहितकाम्यया॥ ४२६
परंज्ञानमकथ्यंचनदेयंयस्यकस्यचित् ॥श्रध्दधानायदातव्यंभक्तियुक्तायधीमते॥ ४२७ ॥अनास्तिकायशध्दायधर्मनित्याय-
भामिनि ॥सुखासनेथशय्यायांयोगंयुंजीतयोगवित्॥ ४२८ ।।दिपंविनांधकारेतुप्रजासुसेतुधारयेत ॥ तर्जन्यापिहितौकर्णौपीड-
यित्वामुहूर्तकं॥ ४२९ ॥तस्मात्संश्रूयतेशब्दस्तुंदवन्हिसमुद्भवः॥ सध्मातोभुक्तमेवंहिपचत्यन्नंक्षणादपि॥ ४३०।।सर्वरोगंनिहं

त्याशुज्यराद्युपद्रवान्बहून् ।।यश्चोपलक्षयेन्नित्यमेकांते घटिकाद्वयं ।। ४३१ ।।जित्वामृत्यंयथाकामंस्वेच्छयापर्यटेदिह।।सर्वतःसर्व द-
र्शीचसर्वसिध्दिमवाप्नुयात् ।। ४३२ ।।यथाभ्रंनदतेनादंप्रावृषनभसिसंस्थितं।। तंश्रुत्वामुच्यतेयोगीसद्यःसंसारबंधनात् ।। ४३३ ।।ततःसयो-
गिभिर्नित्यंसूक्ष्मःसूक्ष्मतरोभवेत् ।।एतत्तेकथितंदेविशब्दब्रह्मविधिक्रमं ।। ४३४ ।।पलालमिवधान्यार्थीत्यजेद्धुंघमशेषतः।।शब्दब्रह्मइदं
प्राप्ययेकेचिदन्यकांक्षिणः।। ४३५ ।।घ्नंतिते मुष्टिनाकाशंकंडयंतिक्षुधातुषान् ।। ज्ञात्वापरमिदंब्रह्मस्फरवदंमुक्तिकारणं।। ४३६ ।।अवाच्यमन-
क्षरंचैवसर्वोपाधिविवर्जितं ।। मोहिताःकालपाशेनमृत्यपाशवशंगताः।। ४३७ ।।शब्दब्रह्मनजानंतिपापिनस्तेकुबुध्दयः।। तावभ्रमतिसंसा
रेयावद्ब्रह्मनविंदति।। ४३८ ।।विदितेतुपरेतत्त्वेमुच्यतेजन्मबंधनात्।। निद्रालस्यंमहाविघ्नंजित्वाशत्रुंप्रयत्नतः।। ४३९ ।।सुखासनेस्थि
तोनित्यंशब्दब्रह्माभ्यसेन्निशि ।।शतवृध्दःपुमान्नूनंधायावदायुष्यमभ्यसेत् ।। ४४० ।।मृत्यंजयवपुस्तंभआरोग्यंचायुर्वर्धनं।।प्रत्ययो
दृश्यतेवृध्देकिंपुनस्तरुणेजने।। ४४१ ।।नचोंकारोनमंत्रोपिनैवबीजंनचाक्षरं ।।अनाहतमनुच्चार्यशब्दब्रह्मपरंशिवं।। ४४२ ।।तस्मा-
च्छब्दानवप्रोक्ताःप्राणविभ्दिस्तुलक्षिताः।।तान्प्रवक्ष्यामियत्नेननादसिध्दिमनुक्रमात् ।। ४४३ ।। घोषंकांस्यंतथाश्टंगंघंटावीणादिवंश
कम् ।।दुंदुभिःशंखशब्दश्चनवमंमेघगर्जितम् ।। ४४४ ।।नवशब्दंपरित्यज्यॐकारंतुसमाश्रयेत् ।। ध्यायन्नेवंसदायोगीपुण्यपापै-
र्नलिप्यते ।। ४४५ ।।नश्टणोतियदाश्टण्वन्षण्मासेचतदंबिके।। म्रियतेभ्यस्यमानस्तंयोगीतिष्टेद्दिवानिशम् ।। ४४६ ।।तस्मादुत्प
द्यतेशब्दोमृत्यजित्ससभिर्दिनैः।।प्रथमंनदतेघोषमात्मशुध्दिकरंपरम् ।। ४४७ ।।सर्वव्याधिहरंनादंवश्याकर्षणमुत्तमम् ।।द्वितीर-
यंनदतेकांस्यंस्तंभयेत्प्राणिनांगतिम् ।। ४४८ ।।विषंभूतग्रहान्सर्वान्बंधयेन्नात्रसंशयः।।तृतीयंनदतेश्टंगमभिचारेनियोजयेत् ४९
विद्वेषोच्चाटनेशत्रोर्मारणेच्चप्रयोजयेत् ।।घंटानादंचतुर्थंतुवदतेपरमेश्वरः।। ४५० ।।आकर्षेसर्वदेवानांकिंपुनर्मानुषाभुवि।।यक्षगंध
र्वकन्याश्चतस्याक्रुष्टाददंतिहि।। ४५१ ।।यथेप्सितांमहासिध्दिंयोगिनःकामतोपिवा ।। वीणातुपंचमोनादःश्रूतयेयोगिभिःसदा ।।
४५२ ।।तस्मादुत्पद्यतेदेविदूराद्दर्शनमेवहि।।ध्यायतेवंशनादंतुसर्वज्ञत्वंप्रजायते।। ४५३ ।।दुंदुभिंध्यायमानस्तुजरामृत्यविवर्जितः ।।

शंखशब्देनदेवेशिकामरूपंप्रपद्यते॥ ४५४ ।योगिनोमेधनादेनवियत्संगमतोभवेत्॥सर्वज्ञ:सर्वदर्शीचकामरूपीव्रजत्यसौ॥४५५
एतत्तेसर्वमाख्यातंकिंभूयःश्रोतुमिच्छसि ।देव्युवाच ॥ वायोस्तुपदमाप्नोतियोगाकाशसमुद्भवात्॥ ४५६ ॥ तन्मेसर्वंसमाचक्ष्व
प्रसन्नस्त्वंयदिप्रभो॥ शंकरउवाच॥ पुरामेसर्वमाख्यातंयोगिनांहितकाम्यया॥ ४५७ ।कालंजिगमीषोः सम्यग्वायोर्लिंगंयथाभ
वेत्॥तेनज्ञात्वादिनंयोगिप्राणायामपरिस्थितः॥ ४५८ ॥सजयत्यागतंकालंमासार्ध्देनैवसुंदरि॥ हृत्स्थोवायुःसदावन्हेर्दीपकःसो
नुपावकः॥ ४५९ ।सबाह्याभ्यंतरव्यापिवायुःसर्वगतोमहान्॥ज्ञानविज्ञानमुत्साहंसर्ववायोःप्रवर्तते॥ ४६० ।येनेहनिर्जितोवा
युस्तेनसर्वमिदंजगत्॥धारणायांसदातिष्टेज्जरामृत्यजिघांसया॥ ४६१ ॥लोहकारोयथाभस्त्रामापूर्यमुखतोन्यतः॥ धारयेद्वायुनाक
मेतद्वद्योगीसमभ्यसेत्॥ ४६२ ॥देवःसहस्रकोनेत्रपादहस्तसहस्रकः॥खंयोपिसर्वमावृत्यसोग्रेतिष्टद्दशांगुलम्॥ ४६३ ॥गाय
त्रींशिरसासार्ध्दंजपेद्व्याहृतिपूर्वकम्॥त्रिःपठेदायतप्राणःप्राणायामःसउच्यते॥ ४६४ ॥गत्वागत्वानिवर्त्तंतेचंद्रसूर्यादयोग्रहाः
आद्यापिननिवर्त्तंतेप्राणायामपरायणाः ४६५॥शतमब्दंतपस्तप्त्वाकुशाग्रापःपिबेद्द्विजः॥तदाप्नोतिफलंदेविप्राणानांधारणैकया॥
४६६॥यो द्विजःकल्यमुत्थायप्राणायामैकमाचरेत्॥सर्वपापंनिहत्याशुब्रह्मलोकंसगच्छति॥ ४६७ ॥योतंद्रितःसदैकांतेप्राणाया
मपरोभवेत्॥ जरांमृत्यंविनिर्जित्य वायुगःखेचरीतिसः॥ ४६८ ॥सिध्दस्यभवतेरूपंकांतिर्मेधापराक्रमः॥ शौर्यवायुसमोगत्यासौ
ख्यंश्लाध्यंस्करादिभिः॥ ४६९॥एतत्कथितमशेषंवायोःसिध्दिंयदाप्नुतेयोगी॥ यत्तेजसोपिलभतेतत्तेवक्ष्यामिदेवेशि॥ ४७०॥
स्थित्वास्वासनेसौसुध्वांतेजनवचनहीनेतु॥शिशिरायिंयुत्स्यात्तेजःप्रकाशयेन्मध्यमेदेशे॥ ४७१ ।वन्हिगतंभ्रूमध्येप्रकाशतेन
यस्त्वतंद्रितोयोगी॥तारंपश्येद्ध्यायेन्मुहूर्तार्ध्दंतमेकभावोपि॥ ४७२ ॥ततस्तुतमसिध्यानीपश्यतेज्योतिरैश्वरम्॥श्वेतंरक्तंतथापि
तंकृष्णामिंद्रायुधप्रभम्॥ ४७३ ॥भ्रुवोर्मध्येललाटस्थंबालार्कसमतेजसं॥ तंविदित्वातुकामांगीक्रीडतेकामरूपधृक्॥ ४७४॥का
रणप्रसमावेशंपरकायप्रवेशनं॥ अणिमादिगुणावाप्तिर्मनसाचावलोकनं॥ ४७५ ॥दूराच्छ्रवणविज्ञानमदृश्यंबहुरूपधृक्॥संतता-

भ्यांसयोगेनखेचरत्वंप्रजायते ॥ ४७६ ॥श्रुताध्ययनसंपन्नानानाशास्त्रविशारदाः ॥ ज्ञानिनोपिविमुह्यंतेपूर्वकर्मवशानुगाः॥ ४७७ ॥
पश्यंतोपिनपश्यंतिशृण्वानाबधिरायथा ॥ यथांधामानुषेलोकेमूढाःपापविमोहिताः॥ ४७८ ॥वेदाहमेतंपुरुषमहांतमादित्यवर्णंतमसःपर
स्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेप्रापणाय ॥ ४७९ ॥एतत्तेकथितंसम्यक्तेजसोविधिमुत्तमं ॥ कालंजित्वायथायोगीचा
मरत्वंप्रपद्यते ॥ ४८० ॥पुनःपरतरंवक्ष्येयथामृत्युर्नजायते ॥ तुरीयाद्वैविभूतानियोगिनोध्यानिनःकदा ॥ ४८१ ॥सुखासनेसमास्थाययो
गीनियतमानसः ॥समुन्नतशरीरोपिसबद्ध्वाकरसंपुटं ॥ ४८२ ॥चंचाकारेणवक्त्रेणपिबन्वायुंशनैःशनैः ॥प्रस्रवंतिक्षणादापस्तालुस्था-
जीवदायकाः ॥ ४८३ ॥ताजिघ्रेद्वायुनादायामृतंतच्छीतलंजलं ॥ पिबन्ननुदिनंयोगीनमृत्युवशगोभवेत् ॥ ४८४ ॥दिव्यकायोमहातेजाः
पिपासाक्षुद्विवर्जितः ॥ ४८५ ॥बलेननागस्तुरगोजवेनदृष्ट्यासुपूर्णःसुश्रुतिस्तुदूरात् ॥आकुंचिताकुंडलीकृष्णकेशोगंधर्वविद्याधरतुल्य-
वर्णः ॥ ४८६ ॥जीवेन्नरोवर्षशतंसुराणांसुमेधसावाक्पतिनासमत्वं ॥ ४८७ ॥पुनरन्यत्प्रवक्ष्यामिविधानंयत्सुरैरपि ॥गोपितंतुप्रयत्नेन
तच्छृणुष्ववरानने ॥ ४८८ ॥समाकुंच्याभ्यसेद्योगीरसनांतालुकंप्रति ॥ किंचित्कालांतरेणैवक्रमात्प्राप्नोतिलंबिकां ॥ ४८९ ॥ ततःप्र-
स्रवतेसातुसंस्पृष्ट्वाशीतलांसुधां ॥ पिबन्नेवसदायोगीसोमरत्वंहिगच्छति ॥ ४९० ॥रेफाग्रंलंबकाग्रंकुरुतलघटनंशंखपद्मस्यबिंदुस्ते
नाकृष्टंसुघोघंपततिपरपदेदेवतानंदकारं ॥सारंसंसारसारंकृतकलुषतरंकारणंकालतारंयेनेमंप्लावितांगःसभवतिअमरःक्षुत्पिपासाविही-
हीनः ॥ ४९१ ॥एभिर्युक्तस्याचतुर्भिःक्षितिधरतनयेयोगीनेयंधरावैधैर्यान्नित्यंकुतोनःसकलमपिजगद्यत्सुखंप्रायणाय ॥ स्वप्नेदेहिविध
त्तेसकलमपिसदापालसंयच्चदुःखंस्वर्गेप्येवंधरित्र्याःप्रभवतिचततोवासिकिंचिच्चतुर्णां ॥ ४९२ ॥तस्मान्मंत्रैस्तपोभिर्व्रतनियमयुते
रौषधैर्योगयुक्ताधात्रीरक्तामनुष्यैर्नयविनययुतैर्धर्मविभ्दिःक्रमेण ॥ भूतानामादिदेवोनहिभवतिचलःसंयुतोवैचतुर्णांतस्मादेवंप्रवक्ष्ये
विविधमनुदिनंध्यायिकंयच्छिवारव्यं ॥ ४९३ ॥ ॥इतिश्री ह० बृ० मि० स्वस्थारिष्टकालज्ञानाध्यायेशिवपुराणोक्तकालज्ञाननिरूप
णंनाम प्रकरणं ॥ ९ ॥ ॥अथकालप्रशंसापूर्वकं स्वस्थारिष्टकालवंचनं ॥ अथकालप्रशंसा ॥ब्रह्मांडपुराणेप्रथमस्कंधेसर्गेयंका-

लवशगोजायतेवर्धतेनिशं॥ हीयतेम्रियतेकालेतस्मात्कालोहिकारणं॥ ४९४ ॥कालःकलयतालोकेकालात्सर्वंप्रवर्त्तते कालेफलतिसर्वं
हिकालएवदुरत्ययः॥ ४९५ ॥यभ्दयात्सकलंविश्वंस्थैर्यतांनेतिकुत्रचित्॥सस्वयंनिर्भयःसाक्षीकालरूपीमहेश्वरः॥ ४९६ ॥येदेवाश्च
मानवाःक्षितितलेस्वर्गेंतरिक्षेचलेपातालेनिवसंतिपन्नगगणादिक्पालमुख्याअपि॥योगींद्राऋषयोमुनीन्द्रपितरोभूताःपिशाचादयस्तेसर्वेकि
लकालजालपतिताःकालःस्वयंनिर्भयः॥ ४९७ ॥ ॥तथाश्रीनारदउवाच॥ कालज्ञानं॥ महादेववदविस्तरतोमम॥ कीदृशःकथमुत्प
न्नंकेनैवात्रप्रवर्त्तते॥ ४९८॥ श्रीशिवउवाच॥ नित्योयंसर्वजीवानांशास्तासंहारकारकः॥ शिरोपरिभ्रमन्नायुःसंहरत्येवजन्मि-
नां॥ ४९९ ॥यथासूर्यादहोरात्रंतमोमासाब्दकंभवेत्॥एवंकालगतिर्लोकेविख्याताज्योतिषांमते॥ ५०० ॥सएकोपित्रिधालोकेप्रो-
च्यतेगुणयोगतः॥भूतोभाविर्वर्त्तमानःकर्त्तृकर्मक्रियात्मकः॥ ५०१ ॥भूतस्तुराजसोज्ञेयोवर्त्तमानस्तुसात्विकः॥भविष्यस्तामसःप्रो-
क्तोज्ञानगम्यःसनातनः॥ ५०२ ॥बालयौवनवृद्धादियत्किंचिद्वयसांगतिः॥ तत्कालेनप्रजायेतनकालस्यवयोगतिः॥ ५०३ ॥चतुर्धा
युगमर्यादांविभज्यस्वात्ममायया॥सर्वेषांप्राणिनामायुःसंहरत्येवनित्यशः॥ ५०४ ॥नकालादाधिकंकिंचिद्वर्त्ततेभुवनत्रये॥ कालात्परत
रंविद्धिपूर्णब्रह्मसनातनं॥ ५०५ ॥ कर्मणाकलनायत्रयत्रनामाकृतिर्गुणाः॥ तत्रकालगतिस्तत्तुवाङ्मनोगोचरंपरं॥ ५०६ ॥कालस्यक
लनायेनजायतेसर्वजन्मिनां॥कालातीतंहितद्विद्धियत्रकालगतिर्नही॥ ५०७ ॥ यद्विज्ञानेनकालस्यज्ञानंभवतिनारद॥ तदेवपरमानंद
स्वरूपंविद्धिशाश्वतं॥ ५०८ ॥यत्रकालोभयंतत्रकालोयंभयकारणं॥ निर्भयंपरमानंदस्वरूपंकालदुर्गमं॥ ५०९ ॥यत्रसूर्योदयस्तत्रनभवे
त्सप्तसांगतिः॥एवंकालगतिर्नास्तिकालातीतपदेध्रुवे॥ ५१० ॥ततःपरतरंकिंचिन्नास्तिवस्तुसनातनं॥तदेवपरमंधामतदेवपरमंपदं ११
तस्यैवांशोभवज्जीवास्तेनचैतन्यसंयुतः॥ तस्यांशेलयतांयांतिसदैवाव्यक्तसंज्ञिके॥ ५१२ ॥पक्षद्वयेयथाचंद्रोवर्धतेक्षीयतेपुनः॥जीव-
राशिस्तथैवायंतस्मिन्नव्यक्तसंज्ञके॥ ५१३ ॥नजीवोजायतेयत्नान्नायत्नान्म्रियतेखलु॥प्रारब्धवशगोजीवोगच्छत्यागच्छतिक्षितौ॥ ५१४
अज्ञानात्कर्मणांसंगीस्वाहंकारेणजन्मभाक्॥ अहंकाराभिमानेनस्वात्मज्ञानेविनश्यति॥ ५१५ ॥यथाराहुप्रसंगेनस्वरूपंचंद्रसूर्ययोः॥

नदृश्यतेतथैवास्यस्वरूपंतमसावृतं ॥ ५१६॥अज्ञानाज्जीवभावस्थोब्रह्मभावविवर्जितः॥कृत्वाकर्माणिबध्नातिस्वयमेवोर्णनाभिवत्
५१७ ॥स्वात्मज्ञानंविनानैवमुक्तिर्भवतिनारद ।येनेदंज्ञायतेसर्वंस्वात्मज्ञानंतदेवहि॥ ५१८ ॥अंधकारोयथादित्यंविनासर्वोननश्यतिइदं
तस्थंतथाज्ञानंस्वात्मज्ञानंविनाक्वचित् ॥ ५१९ ॥सूर्योदयंविनासर्वमंधेनतमसावृतं॥ तथैवात्मोदयंदेहिविनाजीवःस्वभावकाः ५२०
यत्रसूर्योदयोनास्तितत्रास्त्रिध्वांतसंस्थितिः॥तद्वेवताभसंरूपंब्रह्मज्ञानार्कवर्ज्जितं ॥ ५२१ ॥यत्रमोभासतेलोकेग्रहणेचंद्रसूर्ययोः॥ त-
देवात्रैवतामिस्रंप्रासिद्धंविद्धिनारदः॥ ५२२ ॥तेनेदंभ्रामितंविश्वंसदेवासुरमानुषं ।मुक्तिद्वारंहितछिन्नंनैवपश्यंतिजंतवः॥ ५२३ ॥य
थाश्मपिहितद्वारगव्हरस्थोदिवाकरं॥नपश्यतितथैवायदेहगव्हरसंस्थितः॥अज्ञानावरणेनैवपरमात्मानमव्ययं॥ ५२४ ॥गुरुमंत्रै
कशस्त्रेणचूर्णं कृत्यतमःशिलं॥ गृहीत्वाशक्तियोगेनब्रह्मज्ञानात्मकंमणिं॥ ५२५ ॥संसारगव्हरंहित्वानीत्वात्मनंइदंबुजं॥ ज्ञात्वातेना
त्मकंरूपंनिरूपममगोचरं॥ ५२६ ॥परमात्मानमंतस्थंसूर्यकोटिसमप्रभं॥स्वात्मांतस्थंनिर्विकारंसाक्षिभूतंसनातनं॥ ५२७॥स्वेच्छ
याविहरेध्दीमान्विमानेनयथासुराः॥ नान्योपायोस्तिलोकेस्मिन्मुमुक्षूणांविमुक्तये॥ ५२८॥ तीर्थदानव्रतातिथ्यतपोभक्तिदयादि
भिः॥विनष्टंदुरितंयस्यतस्यमुक्तिर्नसंशयः॥ ५२९ ।सत्तामात्रस्वरूपेणपूर्णब्रह्मसनातनं ॥व्याख्याखिलंस्वरूपेणतिष्टतेत्रयथा
नभः॥ ५३० ।यत्सत्तामधिगम्यविश्वमखिलंसंप्राप्यसंज्ञांतयाव्यापारंकुरुतेनिजेंद्रियपथाचैतन्यमालंब्यतत्॥यद्यत्पश्यतियच्छृ-
णोतिनितरांयज्जिघ्रतिस्पर्शतिप्राश्नानिप्रणितार्त्तिनाशनिपुणंवंदेतमादीश्वरं॥ ५३१॥ ॥अथमध्यमस्कंधे अर्जुनउवाच ॥
कालज्ञानंजगन्नाथकथयस्वदयानिधे॥कालःकतिविधःप्रोक्तःकीदृशःकेननिर्मितः॥ ५३२॥ ॥श्रीभगवानुवाच॥ यभ्दूतंवर्त्त
तेयद्धयभ्दविष्यतिभूतले॥ तेषांनाशेककर्त्तायंकालस्तुनिर्भयःस्वयं॥ ५३३॥ सएवत्रिविधोलोकेविख्यातोगुणयोगतः॥त्रयाणा
जनकत्वात्तुत्रिमुक्तिर्नतुवस्तुतः॥ ५३४ ।मृत्युरयंमोतकः प्रोक्तोऽनियंतासर्वदेहिनां ॥ सूर्यमण्डलसांधिस्थोमृत्युरंशेनपांडव ॥५३५
गतागतेनतस्यैतभ्दासतेसचराचरं॥ निर्माणायगतितस्यप्रकाशायचभूतले॥ ५३६ ।कालस्यसात्विकोंशोयंसर्वजीवगतिप्रदः-

सर्वेषांफलदातायंसाक्षित्वात्कर्मणांनृणां॥ ५३७ ॥धर्मोयंतत्समुत्पन्नोराजसोदंडदायकः॥ नियंतासर्वजीवानामतोयमइति
स्मृतः॥ ५३८ ॥ महारोगादिभिःपुंसांपापकर्मापनुत्तये॥ स्वदूतैर्दुःखदोलोकेधर्मिष्टानांसुखप्रदः॥ ५३९ ॥ तृतीयोंतक इत्यस्मि
न्विख्यातोयंकलिःस्वयं॥ यनेदंदुःखितंसर्वेनस्करवंलभते क्वचित् ॥ ५४० ॥ सूर्यांशोमृत्फरेवायंचंद्रांशोधर्मनायकः॥ तमोंशोंत
कइत्येकेसृष्टिस्थितिलयप्रदाः॥ ५४१ ॥ एवंत्रिभिर्गुणैःसर्वविनिबध्यचराचरं॥ कालःकालकलातीतंचिनोतिब्रह्ममण्डलं॥ ५४२
कालःक्रीडतीसर्वत्रनित्यमेवहरीछया॥ आयुर्गछतिसर्वेषांयथैवाज्यंहुताशनात्॥ ५४३ ॥ यथासर्वशरीराघंभूमावेवविलीयते॥
यथासर्वाणिभूतानिकालस्यप्रकृतौसदा॥ ५४४ ॥ अस्तंगतेयथासूर्ये सर्वशेते मृतोपमं॥ ब्रह्मचैतन्यहीनंतत्कालाधीनंजगत्त्रयं॥
५४५॥ निशात्ययेयथासर्वंपुनरुत्थायनित्यशः॥ करोतिस्वानिकार्याणितथामायात्पयेजगत्॥ ५४६॥ उत्पद्यतेविलियेतकालेकाले
निरंतरं॥ कालस्योदरमध्यस्थंकालमायाविमोहितं॥ ५४७ ॥ यन्मयाभारतेपूर्वंदर्शितंतेधनंजय॥ कालरूपंतदेवाद्यंदेवदानवदुर्ल-
भं॥ ५४८ ॥ नकालादधिकंकिंचिभ्दासतेभुवनत्रये॥ श्रूयतेभासतेयच्चतत्सर्वंकालसांस्थितं॥ ४९ ॥ यथाहुताशनःसर्वंभस्म सा-
त्कुरुतेक्षणात्॥ सर्वमेतत्तथाकालोनकालंकोपिपांडव॥ ५५० ॥ दग्ध्वावन्हिर्यथासर्वंस्वयमेवप्रशाम्यति॥ तथाकालोपिसर्वाणिभूतानि
स्यात्ममायया॥ संहृत्यस्वस्वरूपेष्टविलीनोभवतिस्वयं॥ ५५१ ॥ काष्टमध्येयथावन्हिर्वर्त्ततेनतुदृश्यते॥ यथाकालोपिदेहेस्मिन्नप्रसिध्दः
स्वमायया॥ ५५२ ॥ अलक्ष्योपियथावन्हिर्लक्ष्योभवतिदारुतः॥ तथादेहेपिकौंतेययोगाभ्यासेनयोगिनां॥ ५५३ ॥ मथ्यमानेयथाका-
ष्टेत्धादौधूमोद्गमोभवेत्॥ मथ्यमानेतथादेहेधूमवत्कालकल्पना॥ ५५४ ॥ तत्पश्चाभ्दासतेवन्हिर्यथादारुनिमंथनात्॥ तथाकालात्परं
ब्रह्मभासतेयमिनांहृदि॥ ५५५ ॥ यथावन्हिशिखातस्माज्जायतेस्नेहयोगतः॥ तथातभ्दक्तियोगेनपूर्णानंदपदांबुजं ॥ ५५६ ॥ न-
भासते त्हृदयेपुंसांभक्तिभावेनभारत॥ नतस्मादधिकंकिंचि दृश्यतेभुवनत्रये॥ ततोधिकंयद्वदंतितदेवानृतमर्जुन॥ ५५७॥ तस्मात्त्वं-
सर्वभावेनतंभजस्वजगद्गुरुं॥ तत्प्रसादात्परंस्थानंप्राप्स्यसिध्रुवमव्ययं॥ ५५८ ॥ इतितेपरमंगुत्यंकालज्ञानंसनातनं॥ मयाप्रकाशि

तंपार्थनवाच्यंयस्यकस्यचित् ॥ ५५९ ॥येनेदंकवलीकृतंत्रिभुवनंदेवासुरामानवायभ्दीत्याचकितानिरंतरंममीस्थैर्यनयांतिकुपि
त् ॥यन्मायावरणावृतोपमचलंस्वात्मस्वरूपंपुमान्नोजानातितमादिकारणमहाकालंनमामिध्रुवं ॥ ५६० ॥ ॥अथलैंगेपूर्वभागे
सूतउवाच ॥अतऊर्ध्वंप्रवक्ष्यामिअरिष्टानि निबोधतेयेनज्ञानविसेषेणमृत्युंपश्यतिदेहिनः ॥अरुंधतींध्रुवंचैवसोमछायांमहा-
पथं ॥ ५६१ ॥येनपश्येन्नजीवेत्सनरःसांवत्सरात्परं ॥ अरस्मिमंतमादित्यंरस्मिमंडितपावकंयःपश्यतिनजीवेत्समासादेकादु-
र्ध्वात्परं ॥ वमेन्मूत्रपुरीषंवास्वर्णरजतंतथाप्रवक्ष्यंयदिवास्वप्नेदशमासान्सजीवति ॥ रुक्मवरांद्रिपंपश्येद्धर्मनागराणिचपस्ये
स्प्रेतापिशाचांश्चनवमासान्सजीवति ॥ ५६३ ॥अकस्माभ्दवतिस्थूलोत्यकस्माद्वाकृशोभवेत् ॥ अकृतेविकृतिंप्राप्यअष्टौमासो
पजीवती ॥ ५६४ ॥अग्रतोपृष्टतोवापिखंडपादंपश्यतभवेत् ॥पांशुलेकर्दमेवापिससमासंसजीवति ॥ ५६५ ॥ काकःकपोतो
गृध्रोवानिलियेद्यस्यमुर्ध्दनि ॥ क्रव्यादोवाखगोवाऽपिषण्मासंनातिवर्त्तते ॥ ५६६ ॥गच्छेद्वादशपंक्तिभिःपांशुवर्षेणचापुतः ॥
स्वछायाविकृतिंपस्येच्चतुःपंचसजीवति ॥ ५६७ ॥ अनभ्रावीष्कृत्तींपश्येत्दक्षिणांदिसिमाश्रितां ॥ उदकेधनुरैंद्रंवात्रीणिद्वौवा
सजीवति ॥ ५६८ ॥अप्सुवाथ दिवादेसेयोस्वात्मानंनपश्यति ॥ आशिरस्केसवापस्येन्मासादूर्ध्वंनजीवति ॥ ५६९ ॥सवेगं-
धिभवेत्ण्यांत्रैवसागंधमथापिवा ॥ मृत्युस्तस्यागतस्तस्यअर्ध्दमासान्नजीवति ॥ ५७० ॥यस्यवैस्नातमात्रस्यत्हृदयंपरिशु-
ष्यते ॥धूमंवामस्तकेयस्येद्दशाहान्नस जीवति ॥ ५७१ ॥सानिम्नोमारुतोयस्यमर्मस्थानानिकृंतनि ॥ अभ्दिःस्पष्टोनहृष्येतत
स्यमृत्युरूपस्थितः ॥ ५७२ ॥ऋक्षवानरयुक्तेनरथेनाशांतुदक्षिणां ॥गायन्नथस्यव्रजेत्स्वप्नेविद्यान्मृत्युमुपस्थितं ॥ ५७३ ॥ कृ-
ष्णांबरधराण्यामागायंतीवाप्यथांगना ॥यत्रयेद्दक्षिणामासांस्वप्नेसोपिनजीवति ॥ ५७४ ॥ छिद्रंवास्वस्यकृष्णस्यस्वप्नेयोवीक्ष्य
तेनरः ॥ नग्नांवाश्रायणींदृष्ट्वाविद्यांमृत्युमुपस्थितां ॥ ५७५ ॥आमस्तकतलाद्यस्तुनिमज्जेत्यंकसागरे ॥ दृष्ट्वातुतादृशंस्वप्नंसद्य-
ावनजीवति ॥भस्मांगारश्चकेशांश्चनदींशुष्कांभुजंगमान् ॥पस्येद्योदशरात्रंतुनसजीवतितादृसः ॥ ५७६ ॥ कृष्णौश्चाविकटैश्चैवपु-

रुषैरुघतायुधैः पाषाणैस्ताडयते स्वप्नेयः सद्योनसजीवति ॥ ५७७ ॥ सूर्योदयेप्रत्युषसीप्रत्यक्षंयस्यवैशिवाः ॥ क्रोशंत्यभिमुखास्ध्येति
सगतायुर्भवेन्नरः ॥ ५७८ ॥ यस्यवैस्नानमात्रस्यत्हृदयंपीडयते भ्रसं ॥ जायतेदंतघर्षश्चतंगतायुषमादिसेत् ॥ ५७९ ॥ भुयोभुयः-
स्वसियस्तु रात्रौवायदिवादिवादिपगंधंनचाघ्राति विंद्यान्मृत्यमुपस्थितं ॥ ५८० ॥ रात्रौचंद्रधनुःपश्येद्दिवा नक्षत्रमंडलंपरनेत्रेथवा
त्मानंपस्येनसजीवति ॥ ५८१ ॥ नेत्रमेकंस्रवेद्यस्य कर्णौस्थानाच्चभ्रश्यतःवक्रनासाच्चभवतिसज्ञेयोगतजीवितं ॥ ५८२ ॥ य-
स्यकृष्णांस्वानांजिह्वापद्माभासंचवैमुखंगंडेवापिंडिकारक्तायस्यमृत्पुरुपास्थितं ॥ ५८३ ॥ मुक्तकेशोहसंश्चैवगायंनृत्यश्चयोन्-
नरः ॥ याम्यामभिमुखंगच्छेत्तदंतंतस्यजीवितं ॥ ५८४ ॥ ऊर्ध्वाचदृष्टिर्नचसंप्रातिष्ठितारक्तापुनःसंप्रतिवर्ततेमुभामुखस्य-
शोषः स्फषिराच्चशीतानाभिस्त्युष्णाविषमस्थएष ॥ ५८५ ॥ उष्ट्रावारासभावापियिछु क्ताःस्वप्नेरथेषुमाःयस्यसोपि नवैजीवि
